# 9 आम्लं द्राक्षाफलम्



एकः शृगालः ।

एकः शृगालः वनं गच्छति ।

सः वनं गच्छति ।

पिपासा तस्य बुभुक्षा

पिपासया बुभुक्षया वनं गच्छति।

सः वनं गच्छति ।

किं च करोति सः किं च करोति ?

वामतः पश्यति दक्षिणतः पश्यति

अग्रतः पश्यति पृष्ठतः पश्यति

स्वेदः जायते तृषा जायते ।


इतः गच्छति

किमपि न लभते ।

ततः गच्छति

किमपि न लभते ।

श्रान्तः जायते खिन्नः जायते ।



किं च पश्यति सः किं च पश्यति ?

पश्यति द्राक्षालताम्

सः पश्यति द्राक्षाफलम् ।

उपरि उपरि लतासु

दृश्यते च तत् फलम् ।

अनुक्षणं तन्मुखे रसः जायते ।


किं च करोति सः किं च करोति ?

एकवारम् उत्पतति, द्विवारम् उत्पतति,

त्रिवारम् उत्पतति, पुनः पुनः उत्पतति ।

स्वेदः जायते श्रमः जायते

लभते न द्राक्षाफलम् ।



किं च कथयति सः किं च कथयति ?

"आम्लं द्राक्षाफलम् !"

इत्येवं कथयति पलायते

इत्येवं कथयति पलायते ।

## Glossary

**पिपासा** thirst **बुभुक्षा** hunger **इतः ततः** here and there **श्रान्तः** tired **दक्षिणतः** on right side **वामतः** on left side **अग्रतः** in front **पृष्ठतः** behind **स्वेदः** sweat **तृषा** thirst **उत्पतति** jumps **अनुक्षणम्** the next/moment **इत्येवं** (after) saying this.

**विशेषः**

**इत्येवं** इति एवम् ।

**किमपि** किम् अपि ।

## Exercise

**1. Pronounce the following words orally :**

शृगालः, बुभुक्षया, पिपासया, श्रान्तः, खिन्नः, दक्षिणतः, स्वेदः

द्राक्षालताम्, दृश्यते, अनुक्षणम्, तन्मुखे, उत्पतति, द्विवारम्, आम्लम् ।

**2. Find out the correct option from those given below for the following questions :**

(1) शृगालः कुत्र गच्छति ?

शृगालः ग्रामं गच्छति । ☐

शृगालः मंदिरं गच्छति । ☐

शृगालः वनं गच्छति । ☐

(2) शृगालः किं पश्यति ?

शृगालः द्राक्षाफलं पश्यति । ☐

शृगालः आम्रफलं पश्यति । ☐

शृगालः जम्बूफलं पश्यति । ☐

(3) द्राक्षाफलं दृष्ट्वा शृगालः किं करोति ?

शृगालः उपविशति । ☐

शृगालः उत्पतति । ☐

शृगालः तिष्ठति । ☐

**3. Complete the following lines :**

(1) एकः शृगालः ....... बुभुक्षया वनं गच्छति।

(2) किं च पश्यति सः ....... रसः जायते ।

**4. Sing this poem with action :**

**5. Think and fill in the blanks :**

(1) रामः सीतायाः वामतः अस्ति । सीता रामस्य ....... अस्ति ।

(2) विनयः कृष्णस्य ....... अस्ति । कृष्णः विनयस्य दक्षिणतः अस्ति ।

(3) वीणायाः अग्रतः शीला अस्ति । शीलायाः ....... वीणा अस्ति ।

(4) सुधा झरणायाः ....... अस्ति । झरणा सुधायाः पृष्ठतः अस्ति ।

**6. Thinking who is sitting अग्रतः, पृष्ठतः, दक्षिणतः and वामतः to you ? Write sentences. For example मम दक्षिणतः सुरेशः उपविशति।**

### ज्ञातव्यम्

- कार्यालयः — office
- वित्तकोषः — bank
- उच्चविद्यालयः — high school
- महाविद्यालयः — college
- चिकित्सालयः — dispensary
- यन्त्रागारः — factory